# Shri Ramashatakam

# શ્રીરામશતકમ્

## Document Information

Text title : Shri Ramashatakam 1

File name : rAmashatakam.itx

Category : raama, shataka

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH 04-14

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરામશતકમ્

આપાદકેશમતિસુન્દરદિવ્યગાત્રં
    શ્રીપાદરેણુહૃતગૌતમદારશાપમ્ ।
કોપાતિરક્તનયનક્ષુભિતામ્બુરાશિં
    ભૂપાલસૂનુમવલોકય રામચન્દ્રમ્ ॥ ૧॥

કોદણ્ડકોટિવિનિવેશિતબાહુદણ્ડ-
    માખણ્ડલાદ્યમરપાતિતપુષ્પવર્ષમ્ ।
આયોધનક્ષિતિરજઃપરિધૂસરાઙ્ગ-
    મવ્યાચ્ચિરં રઘુપતેરવસન્નશત્રોઃ ॥ ૨॥

ચન્દ્રોપમં મલયચન્દનરૂષિતાઙ્ગં
    મન્દારપુષ્પપરિપૂજિતપાદપદ્મમ્ ।
બ્રહ્મેન્દ્રદેવમુનિયોગિગણાવૃતં તં
    વન્દેઽરવિન્દનયનં રઘુરામચન્દ્રમ્ ॥ ૩॥

સમ્પૂર્ણચન્દ્રવદનં સરસીરુહાક્ષં
    માણિક્યકુણ્ડલધરં મકુટાભિરામમ્ ।
ચામ્પેયગૌરવસનં શરચાપહસ્તં
    શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૪॥

સીતાપતિં કમલપત્રવિશાલનેત્રં
    રામં કૃપાકરમનન્તગુણાનુરક્તમ્ ।
ઇન્દ્રાદિસર્વસુરસિદ્ધસુપૂજિતાઙ્ઘ્રિં
    નિત્યં ભજેઽહમસુનાયકમપ્રમેયમ્ ॥ ૫॥

એકેન બાણમિતરેણ કરેણ ચાપં
    હારં વહન્તમુરસા શિરસા જટાશ્ચ ।
સીતાસહાયમનુજેન વને ચરન્તં
    શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૬॥

સંસારસાગરસમુદ્ધરણૈકમન્ત્રં
　　બ્રહ્માદિદેવમુનિસેવિતસિદ્ધમન્ત્રમ્ ।
દારિદ્ર્યદુઃખભવરોગવિનાશમન્ત્રં
　　સેવે સદા ગુણનિધિં રઘુરામચન્દ્રમ્ ॥ ૭॥

સીતાસમેતમજિનામ્બરમપ્રમેયં
　　સૌમિત્રિણા નિયતસેવિતપાદયુગ્મમ્ ।
નીલોત્પલદ્યુતિમનન્તગુણં પ્રશાન્તં
　　શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૮॥

શ્રીરાઘવં દશરથાત્મજમપ્રમેયં
　　સીતાપતિં રઘુકુલાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં
　　રામં નિશાચરવિનાશકરં નમામિ ॥ ૯॥

શ્રીરાઘવં દશમુખાન્તકમમ્બુજાક્ષં
　　સીતામનોરમણમમ્બુદનીલદેહમ્ ।
કાકુત્સ્થવંશપયસાન્નિધિપૂર્ણચન્દ્રં
　　શ્રીરામચન્દ્રમનિશં શિરસા નમામિ ॥ ૧૦॥

રાકાશશાઙ્કવદનં રઘુવંશદીપં
　　રાજાધિરાજતનયં રમણીયમૂર્તિમ્ ।
રાત્રિઞ્ચરાન્તકમનન્તગુણં મનોજ્ઞં
　　શ્રીરામચન્દ્રમનિશં શરણં ભજેઽહમ્ ॥ ૧૧॥

કન્દર્પકોટિસદૃશં કરુણામ્બુરાશિં
　　કાકુત્સ્થવંશકનકાચલરત્નદીપમ્ ।
કઞ્જાતપત્રનયનં કરચાપબાણં
　　કલ્યાણરામમનિશં શરણં ભજેઽહમ્ ॥ ૧૨॥

વિશ્વાધિપં વિબુધપૂજિતપાદપદ્મં
　　વિપ્રપ્રિયં વિમલપઙ્કજપત્રનેત્રમ્ ।
વિદ્યાત્મકં વિજિતરાક્ષસવીરકોટિં
　　શ્રીવીરરામમનિશં શરણં ભજેઽહમ્ ॥ ૧૩॥

પદ્માસનાદિપુરુહૂતસુરાર્ચિતં તં

પાપાન્ધકારતરણિં પવનાત્મજેશમ્ ।
પઙ્કેરુહાક્ષમખિલશ્રુતિમૌલિસારં
પટ્ટાભિરામમનિશં શરણં ભજેઽહમ્ ॥ ૧૪॥

શ્રીવત્સહારમકુટાઙ્ગદભૂષિતાઙ્ગં
શ્રીભારતીવિધૃતચામરવીજ્યમાનમ્ ।
શ્રીનાયકં શિવવિરિઞ્ચિનુતાઙ્ઘ્રિપીઠં
શ્રીરામચન્દ્રમનિશં શરણં ભજેઽહમ્ ॥ ૧૫॥

યત્પાદપઙ્કજરજઃ શ્રુતિભિર્વિમૃદ્યં (ગ્યં)
યન્નાભિપઙ્કજભવઃ કમલાસનશ્ચ ।
યન્નામસારરસિકો ભગવાન્ પુરારિઃ
શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૧૬॥

હા રામ હા રમણ હા જગદેકવીર-
હા નાથ હા રઘુપતે કરુણાલવાલ ।
હા જાનકીરમણ હા જગદેકબન્ધો
હા રામભદ્ર જનપાલક પાહિ નિત્યમ્ ॥ ૧૭॥

હા વીર હા દશરથાત્મજ મૈથિલીશ
હા દેવ હા પવનજપ્રિય દીનબન્ધો ।
હા ધીર હા દશમુખાન્તક લોકનાથ
હા ભૂપ હા ભરતપૂર્વજ પાહિ નિત્યમ્ ॥ ૧૮॥

જાનાતિ રામ તવ નામરુચિં મહેશો
જાનાતિ ગૌતમસતી ચરણપ્રભાવમ્ ।
જાનાતિ દોર્બલપરાક્રમમીશચાપો
જાનાત્યમોઘપટુબાણગતિં પયોધિઃ ॥ ૧૯॥

જાનાતિ રામ તવ ચિત્તગતિં હનૂમાન્
જાનાતિ રામ તવ સખ્યરુચિં કપીન્દ્રઃ ।
જાનાતિ રામ તવ યુદ્ધગતિં દશાસ્યો
જાનાતિ રામ વિમતાનુજ એવ સત્યમ્ ॥ ૨૦॥
(વિમતાનુજ = વિમતસ્ય શત્રો રાવણસ્ય અનુજઃ વિભીષણઃ)

શ્રીરામ રામ રઘુનન્દન રામ રામ
શ્રીરામ રામ ભરતાગ્રજ રામ રામ ।

શ્રીરામ રામ હનુમત્પ્રિય રામ રામ
 શ્રીરામ રામ શરણં ભવ રામ રામ ॥ ૨૧॥

શ્રીરામચન્દ્ર કરુણાકર રામચન્દ્ર
 રાજેન્દ્રચન્દ્ર રઘુવંશસમુદ્રચન્દ્ર ।
સુગ્રીવનેત્રયુગલોત્પલપૂર્ણચન્દ્ર
 સીતામનઃકુમુદચન્દ્ર નમો નમસ્તે ॥ ૨૨॥

વન્દેન્દુ(ઽબ્જ)મૌલિમણિશોભિપદારવિન્દં
 વન્દે સુચાપશરશોભિકરારવિન્દમ્ ।
વન્દે સદા સ્મિતલસદ્વદનારવિન્દં
 વન્દે કટાક્ષવિલસન્નયનારવિન્દમ્ ॥ ૨૩॥

વન્દે રઘૂત્તમકુલાર્ણવપૂર્ણચન્દ્રં
 વન્દે દશાનનભુજઙ્ગવિહઙ્ગમેન્દ્રમ્ ।
વન્દે સમર્ચિતકવીન્દ્રસુરામરેન્દ્રં
 વન્દે કૃપાજલનિધિં રઘુરામચન્દ્રમ્ ॥ ૨૪॥

ભવતિમિરપતઙ્ગં પાપતૂલસ્ફુલિઙ્ગં
 પ્રણવતરુવિહઙ્ગં ભક્તચિત્તાબ્જભૃઙ્ગમ્ ।
નિગમવનકુરઙ્ગં નીરદશ્યામલાઙ્ગં
 રઘુકુલગિરિશ ૃઙ્ગં નૌમિ સીતાન્તરઙ્ગમ્ ॥ ૨૫॥

સરસિજદલનેત્રં સર્વલોકૈકમિત્રં
 દશરથવરપુત્રં નીલજીમૂતગાત્રમ્ ।
સકલજનપવિત્રં સર્વદા સચ્ચરિત્રં
 વિધૃતકનકવસ્ત્રં (નેત્રં) નૌમિ સીતાકલત્રમ્ ॥ ૨૬॥

વદનજિતનિશેશં કોટિસૂર્યપ્રકાશં
 સકલજગદધીશં માલ્યસંશોભિકેશમ્ ।
નિખિલસુરમુનીશં દૂતશાખામૃગેશં
 વિજિતનિશિચરેશં નૌમ્યહં જાનકીશમ્ ॥ ૨૭॥

સકલભુવનરાજં સર્વશાસ્ત્રાર્થબીજં
 નયનજિતસરોજં સર્વદા સત્સમાજમ્ ।
અઘકરિમૃગરાજં સેવકામર્ત્યરાજં
 દશરથસુતનૂજં નૌમ્યહં રાજરાજમ્ ॥ ૨૮॥

નિગમવિપિનકીરં વેદવેદાન્તસારં
    ભવજલનિધિપારં કણ્ઠસંશોભિહારમ્ ।
તુહિનશિખરધીરં જાનકીપ્રેમદારં
    રુચિરતરશરીરં નૌમ્યહં રામવીરમ્ ॥ ૨૯॥

દશરથનૃપબાલં વેદકલ્પદ્રુમૂલં
    નતજનપરિપાલં સર્વદા લોકપાલમ્ ।
વિધૃતકનકચેલં વાનરેન્દ્રાદિજાલં (જાલમ્ એવં ગર્વઃ)
    મરતકમણિનીલં નૌમિ સીતાનુકૂલમ્ ॥ ૩૦॥

નતસુરનિકુરુમ્બં વક્ત્રશીતાંશુબિમ્બં
    કલભગતિવિડમ્બં દીનચિત્તાવલમ્બમ્ ।
સહચરવિધિસામ્બં સર્વદા સત્કદમ્બં
    કરવિધૃતકલમ્બં નૌમિ સીતાકુટુમ્બમ્ ॥ ૩૧॥

રઘુકુલમણિદીપં સર્વલોકૈકભૂપં
    હૃતજનપરિતાપં દત્તદીનાદિગોપમ્ ।
ધૃતમકુટકલાપં હસ્તવિન્યસ્તચાપં
    કૃતજલનિધિકોપં નૌમિ કલ્યાણરૂપમ્ ॥ ૩૨॥

પવનતનયદૂતં સર્વદા મન્ત્રગીતં
    કુશલવવરતાતં રાવણાદિપ્રઘાતમ્ ।
ધૃતલસદુપવીતં ચન્દનાત્યન્તશીતં
    ત્રિભુવનજનપૂતં નૌમિ સીતાસમેતમ્ ॥ ૩૩॥

વિકચકમલતુણ્ડં ચાપવિદ્યાતિશૌણ્ડં
    કરિકરભુજદણ્ડં કુણ્ડલાશોભિગણ્ડમ્ ।
નખજિતશશિખણ્ડં હસ્તસંશોભિકાણ્ડં
    વિધૃતમણિશિખણ્ડં નૌમિ રામં પ્રચણ્ડમ્ ॥ ૩૪॥

નિગમશિરસિ રત્નં સર્વલોકૈકરત્નં
    દશરથસુતરત્નં સીતયા સેવ્યરત્નમ્ ।
ભુવનવલયરત્નં ભૂ ભુજામેકરત્નં
    રઘુકુલધનરત્નં પાતુ માં રામરત્નમ્ ॥ ૩૫॥

જગતિ વિબુધમન્ત્રં જાનકીપ્રાણમન્ત્રં

વિબુધવિનુતમન્ત્રં વિશ્વવિખ્યાતમન્ત્રમ્ ।
દશરથસુતમન્ત્રં દૈત્યસંહારમન્ત્રં
રઘુપતિનિજમન્ત્રં રામ રામેતિ મન્ત્રમ્ ॥ ૩૬॥

સજલજલદનીલં સન્મુનિસ્તુત્યલીલં
નિખિલનિગમમૂલં યાતુધાનાન્તકાલમ્ ।
તિલકલસિતભાલં સર્વદા લોકપાલં
વિધૃતકનકચેલં નૌમિ સીતાનુકૂલમ્ ॥ ૩૭॥

વિમલકમલનેત્રં વિસ્ફુરન્નીલગાત્રં
તપનકુલપવિત્રં દાનવધ્વાન્તમિત્રમ્ ।
ભુવનહિતચરિત્રં ભૂમિપુત્રીકલત્રં
રઘુપતિવરપુત્રં નૌમ્યહં ચન્દ્રવક્ત્રમ્ ॥ ૩૮॥

મરતકમણિનીલો મત્તમાતઙ્ગલીલો
મધુરવચનશીલો મારુતિપ્રેમમૂલઃ ।
મણિમુકુરકપોલો મૈથિલીકેલિલોલો
મમ હૃદિ રઘુપાલો પાતુ મારીચકાલઃ ॥ ૩૯॥

ત્રિદશકુમુદચન્દ્રો દાનવામ્ભોજચન્દ્રો
મરુત(દિતિજ)તિમિરચન્દ્રો યોગિનાં જ્ઞાનચન્દ્રઃ ।
પ્રણતનયનચન્દ્રો ભક્તિચિત્તાબ્ધિચન્દ્રો
વદનવિજિતચન્દ્રઃ પાતુ માં રામચન્દ્રઃ ॥ ૪૦॥

નિખિલભુવનનેતા નિત્યકલ્યાણદાતા
ત્વમિતિ ન હિ વિવાદસ્તત્ર ઘણ્ટાનિનાદઃ ।
જનયતિ મમ હાસં જાતુ ચેતોનિવાસં
મમ કુરુ ગુણસિન્ધો મૈથિલીપ્રાણબન્ધો ॥ ૪૧॥

પટુજલધરધીરધ્વાનમાકૃષ્ય ચાપં
પવનજવનમેકં બાણમાદાય તૂણાત્ ।
અભયવચનદાયી સાનુજઃ સર્વતો મે
રણહતદનુજેન્દ્રો રામચન્દ્રઃ સહાયઃ ॥ ૪૨॥

કુવલયદલનીલઃ પીતવાસા દયાલુ-
ર્વિવિધરુચિરભૂષાભૂષિતો દિવ્યમૂર્તિઃ ।
દશરથકુલનાથો મૈથિલીપ્રાણનાથો

નિવસતુ મમ ચિત્તે સર્વદા રામચન્દ્રઃ ॥ ૪૩॥

મરતકકનકાભૌ મણ્ડલીભૂતચાપૌ
ભુવનભરણદક્ષૌ પુણ્ડરીકાયતાક્ષૌ ।
મકુટકનકભૂષૌ વીરલક્ષ્મીસમેતૌ
પરિચરતિ મનો મે જાનકીરામચન્દ્રૌ ॥ ૪૪॥

જયતુ જયતુ રામો જાનકીમોદકારી
દશવદનકુલારી રમ્યકોદણ્ડધારી ।
વિવિધવિપિનચારી વિષ્ણુપૂર્ણાવતારી
સકલદનુજહારી સર્વલોકાધિકારી ॥ ૪૫॥

કનકનિકષભાસા સીતયાલિઙ્ગિતાઙ્ગો
નવકુવલયદામશ્યામવર્ણાભિરામઃ ।
અભિનવ ઇવ વિદ્યુન્મણ્ડિતો મેઘરાશિઃ
શમયતુ પરિતાપં સર્વદા રામભદ્રઃ ॥ ૪૬॥

શ્રીરામચન્દ્રઃ શ્રિતપારિજાત-
સમસ્તકલ્યાણગુણાભિરામઃ ।
સીતામુખામ્ભોરુહચઞ્ચરીકો
નિરન્તરં મઙ્ગલમાતનોતુ ॥ ૪૭॥

દયાનિધે રાઘવ રામચન્દ્ર
નિરસ્ય પાપાનિ મમાખિલાનિ ।
ત્વય્યેવ ભક્તિં સુદૃઢાં પ્રયચ્છ
સૈવ પ્રસૂતે સકલાન્ પુમર્થાન્ ॥ ૪૮॥

રામેતિ વર્ણદ્વયમાદરેણ-
સદા જપન્ મુક્તિમુપૈતિ જન્તુઃ ।
કલૌ યુગે કલ્મષમાનસાના-
મન્યત્ર ધર્મે ખલુ નાધિકારઃ ॥ ૪૯॥

રામેતિ સીતારમણેતિ મેઘ-
શ્યામેતિ કાકાસુરરક્ષકેતિ ।
પીતામ્બરેતિ પ્રિયલક્ષ્મણેતિ
શ્રીરામચન્દ્રેતિ વદાશુ જિહ્વે ॥ ૫૦॥

શ્રીરામચન્દ્રેતિ સલક્ષ્મણેતિ
    નીલોત્પલશ્યામલ કોમલેતિ ।
આક્રોશ રામેત્યધુનૈવ જિહ્વે
    સીતાપતે રાઘવ રાઘવેતિ ॥ ૫૧॥

ઇન્દીવરશ્યામલમાયતાક્ષં
    ધનુર્ધરં નીલજટાવચૂડમ્ ।
પાર્શ્વદ્વયે લક્ષ્મણમૈથિલીભ્યાં
    નિષેવ્યમાણં પ્રણતોઽસ્મિ રામમ્ ॥ ૫૨॥

આકર્ણમાકૃષ્ય ધનુર્ગુણોદ્ય-
    દ્બ્રહ્માસ્ત્રલક્ષીકૃતરાક્ષસેન્દ્રમ્ ।
રથાધિરૂઢં રણરઙ્ગધીરં
    રામં ભજે રક્તસરોરુહાક્ષમ્ ॥ ૫૩॥

અકાર્મુકાલઙ્કૃતબાહુદણ્ડૈ-
    રરાક્ષસાધીશ્વરભઙ્ગદક્ષૈઃ ।
અજાનકીન્દ્રૈરપયોદનીલૈ-
    રરામચન્દ્રૈરલમન્યદૈવૈઃ ॥ ૫૪॥

અલં વિવાદેન ન માનુષોઽયં
    રામાત્મના રાક્ષસમર્દનાય ।
ભુજઙ્ગશય્યાં પરિમુચ્ય સાક્ષા-
    ન્નારાયણો ભૂમિતલં જગામ ॥ ૫૫॥

કલ્યાણદં કૌશિકયજ્ઞપાલં
    કલાનિધિં કાઞ્ચનશૈલધૈર્યમ્ ।
કઞ્જાતનેત્રં કરુણાસમુદ્રં
    કાકુત્સ્થરામં કલયામિ ચિત્તે ॥ ૫૬॥

મર્ત્યાવતારે મનુજાકૃતિં હરિં
    રામાભિદેહં (ભિધેયં) રમણીયદેહમ્ ।
ધનુર્ધરં પદ્મપલાશનેત્રં
    નમામિ નિત્યં રઘુનાથમૂર્તિમ્ ॥ ૫૭॥

વિશાલનેત્રં પરિપૂર્ણગાત્રં
    સીતાકલત્રં શુભસચ્ચરિત્રમ્ ।

સુગ્રીવમિત્રં જગતઃ પવિત્રં
    વન્દે સુવક્ત્રં વરભૂપપુત્રમ્ ॥ ૫૮॥

કારીરભાસા કલયન્ વિનોદં
    શારીરભાસા જિતશામ્બરારિઃ ।
વારીશગેહે કૃતસેતુરીશો
    મારીચવૈરી મમ સન્નિધત્તામ્ ॥ ૫૯॥

વદન્તુ કેચિચ્ચતુરોઽપિ વેદાન્
    પઠન્તુ શાસ્ત્રાણ્યપરેઽખિલાનિ ।
અટન્તુ તીર્થાન્યપરે પૃથિવ્યાં
    વયં તુ રામં મનસા સ્મરામઃ ॥ ૬૦॥

નમામિ રામં નતપારિજાતં
    કરોમિ રામાઙ્ઘ્રિસરોજપૂજામ્ ।
વદામિ રામસ્ય સુદિવ્યનામ
    સ્મરામિ રામં ન તુ વિસ્મરામિ ॥ ૬૧॥

અન્નં નરાણામમૃતં સુરાણાં
    ભૃઙ્ગાવલીનાં મકરન્દ એવ ।
શ્રીરામપાદામ્બુજસેવકાનાં
    મહાત્મનાં રામકથૈવમુક્તા ॥ ૬૨॥

શ્રીશબ્દપૂર્વં જયશબ્દમર્ત્યં(મધ્યં)
    જયદ્વાયાવુત્તરત(દ્વયં ચોત્તરત)સ્તથૈવ ।
ત્રિસ્સપ્તકૃત્વો ભુવિ રામનામ-
    જપં તુ હન્યાદ્દ્વિજકોટિહત્યામ્ ॥ ૬૩॥

યો દણ્ડકારણ્યનિશાચરેન્દ્રાન્
    કોદણ્ડલીલાવિષયીચકાર ।
વેતણ્ડશુણ્ડાયિતબાહુદણ્ડો
    કોદણ્ડપાણી(ણિઃ) કુલદૈવતં નઃ ॥ ૬૪॥

કોદણ્ડદીક્ષાગુરુમપ્રમેયં
    સલક્ષ્મણં દાશરથિં દયાલુમ્ ।
મહાનુભાવં જગદેકવીર-
    મનાથનાથં રઘુનાથમીડે ॥ ૬૫॥

રામઃ પિતા રાઘવ એવ માતા
 રામઃ સુબન્ધુશ્ચ સુહૃત્ સ એવ ।
રામો ગુરુર્મે પરમં ચ દૈવં
 રામં વિના નાન્યમહં સ્મરામિ ॥ ૬૬॥

માતા રામો મત્પિતા રામભદ્રો
 ભ્રાતા રામો મત્સખો રાઘવેશઃ ।
ભર્તા ત્રાતા રામચન્દ્રો દયાલુ-
 ર્નાન્યં જાને નૈવ જાને ન જાને ॥ ૬૭॥

રઘુનન્દન એવ દૈવતં નો
 રઘુવંશોદ્ભવ એવ દૈવતં નઃ ।
ભરતાગ્રજ એવ દૈવતં નો
 ભગવાન્ રાઘવ એવ દૈવતં નઃ ॥ ૬૮॥

દીનવત્સલમનાથરક્ષકં
 દીર્ઘબાહુમરવિન્દલોચનમ્ ।
દીક્ષિતં સકલલોકરક્ષણં
 દૈવતં દશરથાત્મજં ભજે ॥ ૬૯॥

ઇન્દ્રનીલમણિસન્નિભદેહં
 વન્દ્યમાનચરણં મુનિવૃન્દૈઃ ।
લમ્બમાનતુલસીવનમાલં
 ચિન્તયામિ સતતં રઘુવીરમ્ ॥ ૭૦॥

ચાપં દધાનઃ સ્તનયિત્નુઘોષં
 કર્ષન્નિષઙ્ગાદિષુમપ્યરિઘ્નમ્ ।
આપત્સુ ભૂયાદભયપ્રદો મે
 સાકં સુમિત્રાતનયેન રામઃ ॥ ૭૧॥

યઃ પૂતનામારણલબ્ધવર્ણઃ
 કાકોદરો યેન વિનીતદર્પઃ ।
યશોદયાલઙ્કૃતમૂર્તિરવ્યા-
 ન્નાથો યદૂનામથ વા રઘૂણામ્ ॥ ૭૨॥

(footnote on verse 72)

રામપક્ષેઃ-પૂતનામા રણલબ્ધવર્ણઃ ઇતિ પદચ્છેદઃ ।
કાકોદરઃ કાકાસુરઃ । યશઃ દયા દ્વાભ્યાં અલઙ્કૃતમૂર્તિઃ ।
કૃષ્ણપક્ષેઃ – પૂતના રાક્ષસી । કાકોદરઃ સર્પઃ કાલિયઃ ।
યશોદા નન્દસ્ય પત્ની ।)

જાતો વંશે રઘૂણાં મુનિવરવચનાત્તાટકાં તાડયિત્વા
કૃત્વા પુણ્યામહલ્યાં ત્રુટિતભવધનુર્મૈથિલીવલ્લભોઽભૂત્ ।
પ્રાપ્યાયોધ્યાં નિદેશાત્ પિતુરટવિમગાદ્ધીતસીતોઽસ્તવાલી
બદ્ધાબ્ધિર્ધ્વસ્તલઙ્કો દલિતદશમુખઃ સીતયા રાજ્યમાપ ॥ ૭૩॥

રામં શ્યામાભિરામં રવિશશિનયનં કોટિસૂર્યપ્રકાશં
દિવ્યં દિવ્યાસ્ત્રપાણિં શરમુખશરધિં ચારુકોદણ્ડહસ્તમ્ ।
કાલં કાલાગ્નિરુદ્રં રિપુકુલદહનં વિઘ્નવિચ્છેદદક્ષં
ભીમં ભીમાટ્ટહાસં સકલભયહરં રામચન્દ્રં ભજેઽહમ્ ॥ ૭૪॥

રામ વીરાસનસ્થં હૃદયગતકરવ્યઞ્જિતજ્ઞાનમુદ્રં
જાનૌ વિન્યસ્તહસ્તં જનકતનયયા ભૂષિતં વામભાગે ।
ષટ્છાસ્ત્રં વ્યાહરન્તં પવનસુતનયં ચાગ્રતો માનયન્તં
સંસેવે સેવ્યમાનં કરધૃતધનુષા દક્ષિણે લક્ષ્મણેન ॥ ૭૫॥

વામે કોદણ્ડદણ્ડં નિજકરકમલે દક્ષિણે બાણમેકં
પશ્ચાદ્ભાગે ચ નિત્યં વિદધદભિમતં સાસિતૂણીરભારમ્ ।
વામે ભાગે લસદ્ભ્યાં સહમિલિતતનું જાનકીલક્ષ્મણાભ્યાં
રામં શ્યામં ભજેઽહં પ્રણતજનમનઃખેદવિચ્છેદદક્ષમ્ ॥ ૭૬॥

શુદ્ધાન્તે માતૃમધ્યે દશરથપુરતઃ સઞ્ચરન્તં મનોજ્ઞં
કાઞ્ચીદામાનુવિદ્ધપ્રતિમણિવિલસત્કિઙ્કિણીનિક્વણાઙ્કમ્ ।
ફાલે મુક્તાલલામં મૃદુતરનિનદં નૂપુરં ચારુહારં
બાલં રામં ભજેઽહં મૃદુમધુરગિરં કુણ્ડલશ્રીકપોલમ્ ॥ ૭૭॥

લોકત્રાણાનુકારી દશવદનશિરઃપઙ્ક્તિવિચ્છેદકારી
સીતાસીમન્તકારી મણિમયમકુટોદ્દણ્ડકોદણ્ડધારી ।
લઙ્કાલઙ્કારહારી ભૃગુતનયમનઃસર્વગર્વાપહારી
(વાલિપ્રાણાપહારી) શમયતુ દુરિતં ભૂમિભારાપહારી ॥ ૭૮॥

જાતઃ શ્રીરઘુનાયકો દશરથાન્મુન્યાજ્ઞયા તાટકાં
હત્વા રક્ષિતકૌશિકક્રતુવરઃ કૃત્વાપ્યહલ્યાં શુભામ્ ।

ભઙ્ક્ત્વા ભાર્ગશરાસનં જનકજામુદ્વાહ્ય રામસ્થિતો (રામઃ સ્થિતં)
    જિત્વા ચાધ્વનિ ભાર્ગવં પુનરગાત્ સીતાસમેતં ભજે ॥ ૭૯॥

સ શ્રેયાંસિ બલીનિ સન્દિશતુ તે વીરઃ કૃપાત્મા શુચિઃ
    યન્નેત્રાગ્ચલરક્તિમા સમતનોદબ્ધીશ્વરાગ્રસ્થિતિમ્ ।
યદ્વક્ષો વિમતાનુજાય સદયં લઙ્કાધિપત્યં દદૌ
    યત્પાદાબ્જપરાગપાલિરકરોત્ પાષાણમેણીદૃશમ્ ॥ ૮૦॥

ગીતાર્થામૃતવારિધિં રઘુપતિં શીતાંશુબિમ્બાનનં
    સૂતાઙ્ગીરસનારદૈરભિનુતં વાતાત્મજાભીષ્ટદમ્ ।
આતામ્રાધરશોભિતં સુરનુતં પીતામ્બરાલઙ્કૃતં
    સીતારામમહં ભજામિ શરણં કારુણ્યદુગ્ધાર્ણવમ્ ॥ ૮૧॥

શ્રીરામોઽજનિ રાઘવો મુનિમખં પાતિ સ્મ સીતાપતિઃ
    કાન્તારાણિ નિનાય વીતભયતાં રામેણ વાલી હતઃ ।
આનન્દં હનુમત્ ? ? રઘુપતિર્નિન્યે જજૃમ્ભે બલે ?
    લકેશઃસ્વપદાત્ સ્વયં વિજઘટે રામઃ સ્ત્રિયાગાત્પુરીમ્ ॥ ૮૨॥

શ્રીરામં જગદેકવીરમમલં સીતામનોહારિણં
    કૌસલ્યાવરનન્દનં સુરનુતં કાકુત્સ્થવંશોદ્ભવમ્ ।
લોકાનામભિવાઞ્છિતાર્થફલદં કારુણ્યકલ્પદ્રુમં
    વન્દેઽહં જનઘોરપાપનિકરધ્વંસવ્રતં રાઘવમ્ ॥ ૮૩॥

રામ લક્ષ્મણપૂર્વજં રઘુપતિં સીતાપતિં સુન્દરં
    કાકુત્સ્થં કરુણાકરં ગુણનિધિં વિપ્રપ્રિયં ધાર્મિકમ્ ।
રાજેન્દ્રં સત્યસન્ધં દશરથતનયં શ્યામલં શાન્તમૂર્તિં
    વન્દે લોકાભિરામં રઘુકુલતિલકં રાઘવં રાવણારિમ્ ॥ ૮૪॥

રામં ચન્દનશીતલં મણિલસદ્રુક્માम્બરાલઙ્કૃતં
    કૌસલ્યાતનયં વિશાલનયનં સમ્પૂર્ણચન્દ્રાનનમ્ ।
રાજાનં કરુણાસમેતમનઘં સીતામનોહારિણં
    સીતાદર્શનલાલસં ગુણનિધિં વન્દે સદા રાઘવમ્ ॥ ૮૫॥

રામં રત્નકિરીટકુણ્ડલધરં કેયૂરહારાન્વિતં
    સીતાલઙ્કૃતવામભાગમમલં વીરાસને સુસ્થિતમ્ ।
સુગ્રીવાદિસમસ્તવાનરગણૈઃ સંસેવ્યમાનં સદા
    વિશ્વામિત્રપરાશરાદિમુનિભિઃ સંસ્તૂયમાનં ભજે ॥ ૮૬॥

રામં રાજશિરોમણિં રઘુવરં દેવારિદર્પાપહં
    લોકાનાં હિતકારિણં ગુણનિધિં કારુણ્યપૂર્ણોદયમ્ ।
મુક્તાકાઞ્ચનભૂષણાન્વિતતનું ચાપેષુહસ્તામ્બુજં
    કૌસલ્યાકુલભૂષણં રઘુપતિં શ્રીરામચન્દ્રં ભજે ॥ ૮૭॥

રામ ત્વચ્ચરણારવિન્દમમલં શ્રીરામપારાયણં
    ભક્તત્રાણપરાયણં ભવભયત્રાણપ્રવીણં સદા ।
તન્મે કર્તુમુપાયનં મમ મનઃ પ્રીતિં દિશા સર્વદા (દિશ ત્વં સદા)
    દીનં દીનશરણ્ય પૂર્ણકૃપયા સીતાપતે પાહિ મામ્ ॥ ૮૮॥

રામો નઃ કુલદૈવતં સકરુણં રામં ભજે સાદરં
    રામેણેશધનુઃ ક્ષણેન દલિતં રામાય તસ્મૈ નમઃ ।
રામાન્નાશમવાપ રાક્ષસકુલં રામસ્ય દાસોઽસ્મ્યહં
    રામે તિષ્ઠતિ વિશ્વમેતદખિલં હે રામ(રક્ષસ્વ) સંરક્ષ મામ્ ॥ ૮૯॥

રામો રક્ષતુ લક્ષ્મણેન સહિતો રામં સરામં ભજે
    રામેણૈવ હિ રક્ષિતાઃ સુરગણા રામાય તસ્મૈ નમઃ ।
રામાન્નાપરમસ્તિ દૈવતમહો રામસ્ય દાસોઽસ્મ્યહં
    રામે તિષ્ઠતુ માનસં મમ સદા હે રામ તુભ્યં નમઃ ॥ ૯૦॥

દિવ્યસ્યન્દનમધ્યગં ઘનરણચ્ચાપાન્વિતં ભીષણં
    કાલાગ્નિપ્રતિમાનબાણકલિતં ઘોરાસ્ત્રતૂણીદ્વયમ્ ।
સૌમિત્ર્યર્કજરાવણાનુજમરુત્પુત્રાદિસંસેવિતં
    રામં રાક્ષસકોટિવીરહરણં શ્રીરામચન્દ્રં ભજે ॥ ૯૧॥

રાજીવાયતલોચનં રઘુપતિં નીલોત્પલશ્યામલં
    મુક્તાલઙ્કૃતમણ્ડપે સુલલિતે સૌવર્ણકે પુષ્પકે ।
આસીનં નવરત્નકાઞ્ચનલસત્સિંહાસને સામ્બુજે
    સીતાલક્ષ્મણવાયુસૂનુસહિતં શ્રીરામચન્દ્રં ભજે ॥ ૯૨॥

કર્પૂરાઙ્ગવિલેપનં રઘુવરં રાજીવનેત્રાન્વિતં
    કસ્તૂરીતિલકાઙ્કિતં કરિવરપ્રત્યેયમેકં પ્રભુમ્ ।
કન્દર્પાયુતકોટિસુન્દરતનું કારુણ્યપાથોનિધિં
    કાન્તાકામમદમપ્રમેયમનઘં સીતાસમેતં ભજે ॥ ૯૩॥

પૂર્વં રામતપોવનાનુગમનં હત્વા મૃગં કાઞ્ચનં

વૈદેહીહરણં જટાયુમરણં સુગ્રીવસમ્ભાષણમ્ ।
વાલીનિગ્રહણં સમુદ્રતરણં લઙ્કાપુરીદાહનં (ઇસ્ ઇત્ દહિનં ?)
પશ્ચાદ્રાવણકુમ્ભકર્ણનિધનં હ્યેતદ્ધિ રામાયણમ્ ॥ ૯૪॥

રાકેન્દુપ્રતિમાનનસ્ય મહિમા હા કેન વા વર્ણ્યતે
લોકે યઃ સ દયાપરોઽજનિ મહાન્ કાકેઽપિ સાન્દ્રાગસિ ।
એકેનૈવ શરેણ યેન સમરે નાકેશસૂનુર્હતઃ
શોકેનાકુલચેતસાં ભુવિ સતાં સાકેતવાસી ગતિઃ ॥ ૯૫॥

યન્નામૈવ સહસ્રનામસદૃશં યત્કર્મ કૈવલ્યદં
યદ્વિદ્યા હૃદયામ્બુજેષુ વિદુષામાનન્દસન્દાયિની ।
યન્મૂર્તિવિજયાન્વિતા ત્રિજગતીરક્ષાવિધૌ દીક્ષિતા
તં કલ્યાણગુણાન્વિતં પ્રતિદિનં શ્રીરામચન્દ્રં ભજે ॥ ૯૬॥

મૈથિલ્યા નગરે વિવાહસમયે કલ્યાણવેદ્યન્તરે
શ્રીમન્તૌ તપનીયરત્નખચિતે પીઠે વ(લ)સન્તૌ શુભૌ ।
શ્રીમન્તૌ નિગમાર્થતત્ત્વવિદુષામાશીર્ગિરૌ પાવનૌ
પાયાસ્તાં ચ વધૂવરૌ સુલલિતૌ શ્રીજાનકીરાઘવૌ ॥ ૯૭॥

યત્પાદઃ સુરસિન્ધુવાસસદનં યન્નાભિજાતોઽબ્જભૂઃ
યઃ સાકેતનિકેતનં યદુદરં લોકૈકશય્યાગૃહમ્ ।
યદ્વક્ષઃ કમલાવિલાસભવનં યન્નેત્રયુગ્મં દયા-
રાશ્યા(લાસ્યા)ગારમખણ્ડમઙ્ગલનિધિઃ પાયાત્ સ નો રાઘવઃ ॥ ૯૮॥

કૌસલ્યા જનની પિતા દશરથઃ સલ્લક્ષણો લક્ષ્મણઃ
શત્રુઘ્નો ભરતોઽનુજો જનકજા જાયા વસિષ્ઠો ગુરુઃ ।
સુગ્રીવશ્ચ વિભીષણઃ પ્રિયસખૌ દૂતો હનૂમાન્ મહાન્
સાયોધ્યા નગરી સુતૌ કુશલવૌ શ્રીરામદાસા વયમ્ ॥ ૯૯॥

રક્ષોઘ્નં રણરાગિણં રવિસમં રુદ્રપ્રિયં રક્ષકં
રૂપૈકાભરણં રુષાદિરહિત રુક્માઙ્ગદારાધિતમ્ ।
રોચિષ્ણું રથિનં રમાપતિસમં રાજ્યપ્રદં રાઘવં
રામં રાજશિરોમણિં રઘુપતિં શ્રીરામચન્દ્રં ભજે ॥ ૧૦૦॥

સાકેતે શરદિન્દુકુન્ત(દ)ધવલે સૌધે મહામણ્ડપે
પર્યસ્તાગરુધૂપગન્ધલલિતે કર્પૂરદીપોજ્જ્વલે ।
સુગ્રીવાઙ્ગદજામ્બવત્પરિવૃતં સૌમિત્રિણા સેવિતં

લીલામાનુષવિગ્રહં રઘુપતિં સીતાસમેતં ભજે ॥ ૧૦૧॥

વામાઙ્ગે જનકાત્મજાં પદતલે વાયોઃ સુતં લક્ષ્મણં
પશ્ચાચ્છત્રુહરં વિભીષણયુતં સુગ્રીવમગ્રે સ્થિતમ્ ।
પાર્શ્વે કૈકયિનન્દનં તદિતરે શત્રુઘ્નસંસેવિતં
રામં નીરદનીલમઞ્જુલતનું સીતાસમેતં ભજે ॥ ૧૦૨॥

વામે ભૂમિસુતા પુરસ્તુ હનુમાન્ પશ્ચાત્સુમિત્રાસુતઃ
શત્રુઘ્નો ભરતશ્ચ પાર્શ્વદલયોર્વાય્વાદિકોણેષુ ચ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારાસુતો જામ્બવાન્
મધ્યે નીલસરોજકોમલરુચિં રામં ભજે શ્યામલમ્ ॥ ૧૦૩॥

કાલામ્ભોધરકાન્તિકાન્તમનિશં વીરાસનાધ્યાસિતં
મુદ્રાં જ્ઞાનમયીં દધાનમપરં હસ્તામ્બુજં જાનુનિ ।
સીતાં પાર્શ્વગતાં સરોરુહકરાં વિદ્યુન્નિભાં રાઘવં
પશ્યન્તં મકુટાઙ્ગદાદિવિવિધાકલ્પોજ્જ્વલાઙ્ગં ભજે ॥ ૧૦૪॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
મધ્યેપુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૧૦૫॥

વૈદેહીકુચમણ્ડલોપરિ લસત્માણિક્યહારાવલી-
મધ્યસ્થોપલનીલકોમલરુચિં નીલોત્પલશ્યામલમ્ ।
કન્દર્પાયુતકોટિસુન્દરતનું કોદણ્ડદીક્ષાગુરું
કૌસલ્યાકુલભૂષણં રઘુવરં રામં ભજે શ્યામલમ્ ॥ ૧૦૬॥

વૈદેહીમધિરોપ્ય જાતપુલકાં લજ્જાવતીં સુસ્થિતાં
કાઞ્ચીકઙ્કણહારનૂપુરલસત્કર્ણાવતંસોજ્જ્વલામ્ ।
કસ્તૂરીઘનસારચર્ચિતકુચાં ચન્દ્રાનનાં જાનકીં
કન્દર્પાયુતસુન્દરં રઘુપતિં રામં ભજે શ્યામલમ્ ॥ ૧૦૭॥

વૈદેહીમધિરોપ્ય જાતપુલકાં વામાઙ્કમાશ્લેષિણીં
વામેન સ્તનચૂચુકં પુલકિતં વામં કરેણ સ્પૃશન્ ।
તત્ત્વં દક્ષિણપાણિના કલિતયા ધીમુદ્રયા બોધયન્
રામો મારુતિસેવિતઃ સ્ફુરતુ મે સામ્રાજ્યસિંહાસને ॥ ૧૦૮॥

ઉત્ફુલ્લામલકોમલોત્પલદલશ્યામાય રામાય નઃ
    કામાય પ્રથમાય નિર્મલગુણારામાય રામાત્મને ।
ધ્યાનારૂઢમુનીન્દ્રમાનસસરોહંસાય સંસારવિ-
    ધ્વંસાય સ્ફુરદોજસે રઘુકુલોત્તંસાય પુંસે નમઃ ॥ ૧૦૯॥

ક્ષીરામ્ભોનિધિમધ્યવર્તિનિશિતા ? ? સુવર્ણામ્બરે
    રક્તોલ્લોચનહેમપદ્મપટલે જામ્બૂનદે મણ્ડપે ।
તેજોધામનિ પુષ્પકે રવિનિભે માણિક્યસિંહાસને
    હેમામ્ભોરુહકર્ણિકાન્તરતલે વીરાસને સુસ્થિતમ્ (? ) ॥ ૧૧૦॥

યે શ ૃણ્વન્તિ પઠન્તિ રામચરિતં યે ભાગ્યવન્તઃ સદા
    ધીરોદાત્તરઘૂત્તમસ્ય ચરણૌ ધ્યાયન્તિ યે માનસે ।
યે કુર્વન્તિ સમસ્તધર્મનિચયં રામસ્ય સુપ્રીતયે
    તેષાં સર્વમનોરથાન્ વિતનુતે સાક્ષાદ્રઘૂણાં પતિઃ ॥ ૧૧૧॥

રામં રામાનુજં સીતાં ભરતં ભરતાનુજમ્ ।
સુગ્રીવં વાયુસૂનું ચ પ્રણમામિ પુનઃ પુનઃ ॥ ૧૧૨॥

યન્નામધેયં મ્રિયમાણ આતુરઃ
    પતન્ સ્ખલન્ વાપ્યવશો ગૃણન્નરઃ ।
વિમુક્તકર્માર્ગલ ઉત્તમાં ગતિં
    પ્રાપ્નોતિ યક્ષ્યન્તિ ન તં કલૌ જનાઃ ॥ ૧૧૩॥

ઇતિ શ્રીરામશતકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramashatakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*